Topic 43

## उभयपदीय अदादिगणीय हकारान्त धातुएँ

दुह प्रपूरणे । दोग्धि । दुग्धः । दुहन्ति । धोक्षि ।
दुग्धे । दुहाते । दुहते । धुक्षे । दुहाथे । धुग्ध्वे । दुहे ।
दुदुहे, दुदुहे । दुदोह । दुदुहे । दोग्धा । धोक्ष्यति ।
धोक्ष्यते । दोग्धु, दुग्धात्, दुग्धाम्, दुहन्तु ।
दुग्धि - दुग्धात्, दुग्धम्, दुग्ध । दोहानि । दोहाव ।
दोहाम । दुग्धाम्, दुहाताम् । दुहताम् । धुक्ष्व ।
दुहाथाम् । धुग्ध्वम् । दोहै । दोहावहै । दोहामहै ।
अधोक् । अदुग्धाम् । अदुहन् । अदोहम् । अदुग्ध ।
अदुहाताम् । अदुहत । अधुग्ध्वम् । दुह्यात् । दुहीत

लिङ्सिचावात्मनेपदेषु ।

इक्समीपाद्धलः परौ झलादी लिङ्सिचौ कितौ स्तस्तङि । धुक्षीष्ट ।

शल इगुपधादनिटः क्सः

इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात् । अधुक्षत् ।

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ।

एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि । अदुग्ध, अधुक्षत ।

क्सस्याचि ।

अजादौ तङि क्सस्य लोपः । (अलोऽन्त्यस्य) अकारलोपः । अधुक्षाताम् । अधुक्षन्त । अदुग्धाः - अधुक्षथाः । अधुक्षाथाम् । अधुग्ध्वम् । अधुक्षध्वम् ।

अधुक्षि । अदुह्वहि, अधुक्षावहि । अधुक्षामहि । अधोक्ष्यत्,
अधोक्ष्यत । एवं दिह उपचये । लिह आस्वादने । लेढि ।
लीढः । लिहन्ति । लेक्षि । लीढे । लिहाते । लिहते । लिक्षे ।
लिहाथे । लीढ्वे । लिलेह । लिलिहे । लेढास्मि । लेढासे ।
लेक्ष्यति । लेक्ष्यते । लेढु । लीढाम् । लिहन्तु । लीढि ।
लेहानि । लीढाम् । अलेट् । अलेड् । अलीढ । अलिक्षत्,
आलिक्षत । अलीढ । अलेक्ष्यत्, अलेक्ष्यत ।